# Shri Para Mahayoni Kavacha Sadhana

# श्रीपरामहायोनिकवचसाधना

## Document Information

Text title : Para Maha Yoni Kavacha Sadhana

File name : parAmahAyonikavachasAdhanA.itx

Category : devii, dashamahAvidyA, devI, kavacha

Location : doc_devii

Transliterated by : Pankaj Dubey

Proofread by : Pankaj Dubey, Preeti N Bhandare

Latest update : December 14, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2023

*sanskritdocuments.org*

# श्रीपरामहायोनिकवचसाधना

॥ श्रीमहा-त्रिपुर-सुन्दर्यै नमः ॥

॥ पूर्व पीठिका ॥
ॐ नमः शिवाय गुरवे, नाद-विन्दु-कलात्मने ।

श्री गणेशाय नमः । श्री मन्महा-त्रिपुर-सुन्दर्यै नमः ।
॥ श्री भैरव उवाच ॥

क्रम-दीक्षा-विधानानि, मयोक्तानि महेश्वरि! ।
त्वयात्मनः कुलागारे, कवचं यत् सु-गोपितम् ॥ १॥

अधुना कृपया त्वं च, तत्-सर्वं वक्तुमर्हसि ।
॥ श्री भैरव्युवाच ॥

शृणु ! नाथ प्रवक्ष्यामि, तन्त्र-सारमिदं महत् ॥ २॥

एतच्छ्री-कवचस्यास्य, पर-ब्रह्म ऋषिः शिवः ।
महती जगतीच्छन्दश्चिच्छक्तिर्देवतोच्यते ॥ ३॥

ऐं वीजं ह्रीं तथा शक्तिः, सकलह्रीं कीलकं तथा ।
पर-ब्रह्म-प्राप्ति-हेतौ, विनियोगः प्रकीर्तितः ॥ ४॥

अथ ॥ विनियोग ॥
ॐ अस्य श्री परा-महा-योनि-कवचस्य श्री पर-ब्रह्म-शिवः ऋषिः ।
महती जगतीः छन्दः । श्री चिच्छक्तिः देवता । ऐं वीजम् । ह्रीं शक्तिः ।
सकलह्रीं कीलकम् । पर-ब्रह्म-प्राप्ति-हेतौ पाठे विनियोगः ।

॥ ऋष्यादि-न्यास ॥
श्री पर-ब्रह्म-शिवः-ऋषये नमः शिरसि ।
महती जगतीः - छन्दसे नमः मुखे ।
श्री चिच्छक्तिः - देवतायै नमः हृदये ।

ऐं-वीजाय नमः गुह्ये ।
ह्रीं-शक्त्ये नमः नाभौ ।
सकलह्रीं-कीलकाय नमः पादयोः ।
पर-ब्रह्म-प्राप्ति-हेतौ पाठे विनियोगाय नमः सर्वाङ्गे (सर्वाङ्गे) ।
॥ ध्यान ॥
ॐ आधारे तरुणार्क-बिम्ब-रुचिरं हेम-प्रभं वाग्भवम् ।
बीजं मन्मथमिन्द्र-गोप-सदृशं हृत्-पङ्कजे संस्थितम् ॥

विष्णु-ब्रह्म-पदस्थ-शक्ति-कलितं सोम-प्रभा-भासुरम् ।
ये ध्यायन्ति पद-त्रयं तव शिवे ! ते यान्ति सौख्यं पदम् ॥

अथ कवच पाठ ।
ॐ ह्री स्त्रीं हूं फट् उग्र-तारा, मूलाधारं ममावतु ।
ह्रीं भुवनेश्वरी पातु, स्वाधिष्ठानं च मे सदा ॥ १॥

क्रीं हूं ह्रीं दक्षिणा पातु, मणिपुरं तथा मम ।
नमो भगवत्यै हस्ख्फ्रें, कुब्जिकायै श्रां श्रीं श्रूं श्रां श्रीं  श्रूम् ।
ङञणनमे-अघोरा-मुखि छां छीं किणि-किणि विच्चे ॥ २॥

अनाहतं सदा पातु, कुब्जिका परमेश्वरी ।
फ्रें ख्फ्रें गुह्य-काली सा, विशुद्धं मे च रक्षतु ॥ ३॥

क-ए-ई-ल-ह्रीं ह-स-क-ह-ल-ह्रीं स-क-ल-ह्रीं श्रीम् ।
आज्ञा-चक्रं महा-देवी, षोडशी पातु मे सदा ॥ ४॥

हस्क्ष्म्लवरयूँ शक्ष्म्लवरयीम् ।
नाद-चक्रं च मे पातु, श्रीमदानन्द-भैरवः ॥ ५॥

ह्सौः शौः अर्ध-नारीश्वरी बिन्दुश्च मेऽवतु ।
हंसः सोऽहं सदा पातु, सहस्रारं सदा मम ॥ ६॥

कएईलह्रीं  हसकहलह्रीं  सकलह्रीं  श्रीम् ।
शिरो मे पातु सा देवी, महा-त्रिपुर-सुन्दरी ॥ ७॥

“कएईलह्रीं” कामेशी, भ्रू-मध्यं मे सदाऽवतु ।
“हसकहलह्रीं” वज्रेशी, दक्ष-नेत्रं सदाऽवतु ॥ ८॥

“सकलह्रीं” वाम-नेत्रं, रक्षतु भग-मालिनी ।
“हस्त्रें हस्कलह्रीं ह्सौः”, त्रि-नेत्रं पातु भैरवी ॥ ९॥

"ह्रीं श्रीं सौः" त्रिपुरा-सिद्धा, कर्णौ मे परि-रक्षतु ।
"ह्रीं क्लीं क्षुं" मां सदा पातु, मुखं त्रिपुर-मालिनी ॥ १०॥

"हसैं हस्क्लीं हसौं" कण्ठं, पातु श्रीत्रिपुरा-श्रीर्मे ।
"हैं हक्लीं हसौं" पातु, वक्षस्त्रिपुर-वासिनी ॥ ११॥

दौवारिजौ सदा पातु, ह्यणिमाद्यष्ट-सिद्धयः ।
"ह्रीं क्लीं सौः" पातु मे नाभिं, परा त्रिपुर-सुन्दरी ॥ १२॥

दश-मुद्रा-युता देवी, ममोरु पातु सर्वदा ।
"ऐं क्लीं सौः" पातु मे जानू, श्रीमहा-त्रिपुरेश्वरी ॥ १३॥

षड्-दर्शनं सदा पातु, जङ्घा-युग्मं च सर्वदा ।
"अं आं सौः" त्रिपुरा पातु, पादौ च सतत नमः ॥ १४॥

"ॐ ह्रीं श्रीं" पातु मां पूर्वे, श्रीमहा-भुवनेश्वरी ।
"कएईलह्रीं" दक्षिणे मां, पराऽऽद्या परि-रक्षतु ॥ १५॥

"सौः ऐं क्लीं ह्रीं श्रीं" श्रीकुजा, पश्चिमे मां सदाऽवतु ।
"श्रीं ह्रीं क्लीं ऐं सौः" चोत्तरे मां, पातु योगेश्वरी परा ॥ १६॥

"हसकहलह्रीं" पातु, मामधो वज्र-योगिनी ।
"सकलह्रीं" सा ललिता, ह्यूर्ध्वे मां परि-रक्षतु ॥ १७॥

श्रीं-५ ॐ-३ क-५ ह-६ स-४ सौः-५ सदाऽवतु ।
सर्वाङ्गं मे च चिद्रूपा, महा-त्रिपुर-सुन्दरी ॥ १८॥

(श्रीं-५ – श्रीं ह्री क्लीं ऐं सौः,
ॐ-३ – ॐ ह्रीं श्रीं,
क-५ – क ए ई ल ह्रीं,
ह-६ – ह स क ह ल ह्रीं ,
स-४ – स क ल ह्रीं,
सौः-५ – सौः ऐं क्लीं ह्रीं श्रीं)

॥ फल-श्रुति ॥

इति ते कथितं देव!, ब्रह्मानन्द-मयं परम् ।
श्री महा-योनिराख्यातं, कवचं देव-दुर्लभम् ॥ १॥

मम तेजसा रचितं, श्रीविद्या-क्रम-संयुतम् ।
तव स्नेहान्महा-देव!, तवाग्रे तु मयोदितम् ॥ २॥

राज्यं देयं शिरो देयं, न देयं कवचं परम् ।
देयं पूर्णाभिषिक्ताय, स्व-शिष्याय महेश्वर ! ॥ ३॥

अन्यथा नारकी भूयात्, कल्प-कोटि-शतैरपि ।
दिक्-सहस्रेण पाठेन, ह्यासाध्यं साध्यते क्षणात् ॥ ४॥

लक्षं जपत्वा महा-देव!, तद्दशांशं हुनेद् यदि ।
ब्रह्म-ज्ञानमवाप्नोति, पर-ब्रह्मणि लीयते ॥ ५॥

भूर्जे विलिख्य गुटिकां, स्वर्णस्थां धारयेद् यदि ।
कण्ठे वा दक्षिणे बाहौ, साक्षात् कामेश्वरो भवेत् ।
नारी वाम-भुजे धृत्वा, भवेत् त्रिपुर-सुन्दरी ॥ ६॥

ॐ तत्सत् श्रीमहा-निर्वाण-तन्त्रे श्रीमहा-योनि-नाम
श्रीमन्महा-त्रिपुर-सुन्दरी-कवचं सम्पूर्णम् ॥

Encoded by Pankaj Dubey

Proofread by Pankaj Dubey, Preeti N. Bhandare

*Shri Para Mahayoni Kavacha Sadhana*

pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*